# श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्

## सत्रान्तपरीक्षा- दिसम्बर-२०१८

| | | |
|---|---|---|
| कक्षा – **शास्त्री-०३ सेमेस्टर-०५** | **प्रश्नपत्रम्- ०४** | गुणाः - ७० |
| विषयः– पौरोहित्यम् | कोड – OE-3.5.5 | समयः – १० :०० तः ०१:०० |
| दिनाङ्कः – ०७/१२/२०१८ | ग्रन्थः – ब्रह्मनित्यकर्मसमुच्चयः/ कर्मकौशलम् \| | |

**प्रथमान्वितिः**

प्रश्नः १ प्रदत्तेभ्यः कयोश्चित् द्वयोः व्याख्या कार्या। १०

(१) ब्रह्मानुज्ञातः अग्नेरुत्तरतः प्रागग्रैः कुशैः आसनत्रयप्रकल्पनम् । तत्र एकम् अग्नेरुत्तरतः। द्वितीयं तदुत्तरतः। तृतीयं तत्पश्चिमे। वायव्याश्रितं वारणं चमसं दक्षिणहस्तेनादाय। वामपाणौ प्रागग्रं निधाय। दक्षिणहस्तोध्धृतपात्रोदकेन आत्माभिमुखं स्म्पूर्य। पश्चिमासने निधाय।

(२ ) प्राणीतोत्तरतः प्रोक्षणीपात्रं निधाय तत्र चुलूकेन प्राणीतोदकं त्रिः प्रपूर्य पवित्राभ्यामुत्पूर्य पवित्रे प्रोक्षणीषु निधाय दक्षिणेन हस्तेन प्रोक्षणीपात्रमुत्थाप्य सव्ये पाणौ कृत्वा दक्षिणहस्तमुत्तानं कृत्वा मध्यमानामिका-ङ्गुल्योः मध्यमपर्वाभ्यामपामुदिङ्गनम्।

(३) दक्षिणेन पाणिना घृताक्तास्तिस्रः समिधः तिष्ठन्नग्नावाधाय दक्षिणचुलूकगृहीतेन सपवित्रेण प्रोक्षण्युदकेन अग्नेः ईशानकोणादारभ्य ईशानपर्यन्तं प्रदक्षिणवत्पर्युक्षणम् इतरथावृत्तिः। पवित्रयोः प्रणीतासु निधानम्। अग्नेः प्रदीप्तिकरणम्।

प्रश्नः २ द्वयोरेकस्य यथाग्रन्थं सारांशः लेख्यः। १०

(१ ) आघारहोमः। (२) व्याहृतिहोमः।

**द्वितीयान्वितिः**

प्रश्नः ३ कयोश्चित् द्वयोः मन्त्रयोः व्याख्या विधेया। १०

(१) चत्वारिशृङ्गात्रयोऽअस्य पादाद्वेशीर्षेसप्तहस्तासोऽअस्य।
त्रिधाबद्धो वृषभोरोरवीति महोदेवोमर्त्यांऽआविवेश ॥

(२) त्र्यम्बकं य्यजामहे सुगन्धिम्पुष्टिवर्द्धनम्।
उर्वारुकमिवबन्धनान्मृत्योम्मुक्षीयमामृतात् ॥

(३) नमोस्तुसर्पेभ्यो ये के च पृथिवीमनु।
येऽअन्तरिक्षे ये दिवितेभ्यः सर्पेभ्यो नमः ॥

प्रश्नः ४ कस्यचिदेकस्य विवरणं सविस्तरं दत्त॥ १०

(१) अग्निस्थापनस्य समन्त्रं विधिं वर्णयत।

(२) पञ्चलोकपालानां समन्त्रमावाहनं लिखत।

## तृतीयान्वितिः

प्रश्नः ५ अधोदत्तेभ्यः द्वयोः व्याख्या कार्या। १०

(१) आचार्यादयः सावधानाः यजमानाभीष्टसिद्धिप्राप्त्यर्थं मधुसर्पिर्दध्याक्ताकार्दिसमिद्धाज्यचरुतिलद्रव्यं चाभिधार्य स्थापितदेवतानां होमं कुर्युः।

(२) मण्डपाद्वहिः वंशपात्रे सदीपमाषभक्तदध्योदनताम्बूल-दक्षिणाकूष्माण्डोदककुम्भयुतं बलिं संस्थाप्य हरिद्र्कुंकुमसिन्दूरपताकायुतं कृत्वा हस्ते जलमादाय सङ्कल्पं कुर्यात्।

(३) तत्र उपकल्पनीयानि -आज्यस्थाली होमावशिष्टादाज्यादन्यदाज्यं वैकंकती स्रूक् खादिरः स्रुवः सम्मार्गकुशाः पवित्रे नारिकेलफलं ताम्बूलवीटकं पुगीफलं पट्टवस्त्रखण्डं रक्तसूत्रं पुष्पाणि पुष्पमाला च। इत्येतान्युपकल्प्य संकल्पः।

प्रश्नः ६ कस्यचिदेकस्य वर्णनं करणीयम् । १०

(१) नावाहूतिहोमं समन्त्रं विवृणुत।

श्रेयोदानविधिं विवरणपुरस्सरं वर्णयत।

प्रश्नः ७ प्रदत्तप्रश्नेभ्यः दशप्रश्नानामुत्तराणि एकैकवाक्येन दत्त। १०

(१) केन मन्त्रेण क्रव्यादांशं क्षिपेत्?

(२) ' द्विशीषर्कः' कः देवः ?

(३) ब्रह्मासनास्तरणं कुत्र कर्तव्यम्?

(४) सम्मार्जनकुशाः कति भवन्ति ?

(५) उपयमनकुशाः कति भवन्ति ?

(६) भूतप्रेतादिदोषपरिहारार्थं केन द्रव्येण होमः कार्यः ?

(७) सर्षपहोमः किमर्थं करणीयः ?

(८) पूर्णपात्रप्रदानं कस्मै कर्तव्यम्?

(९) अभिषेके पत्न्याः स्थानं कुत्र भवति?

(१०) कस्य स्मृत्या न्यूनं संपूर्णतां याति?

(११) अस्तु परिपूर्णमच्छद्रमिति के वदेयुः?

(१२) क्षेत्रपालमहाबलिविधिः कुत्र कार्यः ?

(१३) लक्ष्मीहोमद्रव्याणि कानि ?

(१४) पूर्वदिशाधिपतिः कः देवः ?

(१५) प्रादेशं कुत्र कुर्यात्?

***